International Journal of Sanskrit Research 2023; 9(4): 22-24

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(4): 22-24
© 2023 IJSR
www.anantaajournal.com
Received: 17-03-2023
Accepted: 02-05-2023

**खेमलालशर्मा**
सकारी संस्कृत महाविद्यालय सामदोङ
सिक्किम, भारत

**Corresponding Author:**
**खेमलालशर्मा**
सकारी संस्कृत महाविद्यालय सामदोङ
सिक्किम, भारत

# पाणिनीयव्याकरणस्य अपादानकारकम्

**खेमलालशर्मा**

**सारांश**
पाणिनीयव्याकरणस्य अपादानकारकस्य समीक्षणे नैकानां ग्रन्थानां प्रमाणं वीक्ष्य सप्रामाणिकं सारभूतं तत्त्वञ्च उद्धृत्य लेख वर्तते। कस्तावत् अपादानमित्यत्र- 'ध्रुवमपायेऽपादानम्'[1] यदवृत्तौ अपायोविश्लेषः तस्मिन् साध्ये ध्रुवमवधिभूतं कारकमपादानसंज्ञकम्।

**कूटशब्द** : ध्रवम्, अपादान्, समवेत,आश्रयत्वम् इति।

**प्रस्तावना**
अत्रेदमपादानमेवं वर्तते 'तत्तत्कर्तृसमवेत-तत्तत्क्रियाजन्य-प्रकृत-धात्ववाच्य-विभागाश्रयत्वमपादानत्वम्'[2] इति। तस्मिन् कर्तरि धातुवाच्यव्याराश्रये समवेतायाः समवायसम्बन्धेन विद्यमानायास्तस्याः क्रियाजन्य उत्पाद्यो यःप्रकृत्धातुवाच्यः प्रस्तुतधात्वविषयो विभागो विश्लेषः तस्याश्रयत्वमिति। अत्र प्रकृत्धातु अवाच्य इति वर्तते, नोचेत्तत्र 'वृक्षात् त्यजति खगः'। अत्रापादनत्वं न स्यादिति। ध्रुवमिति 'ध्रुवनम्' गतिस्थैर्ययोः अस्मात्पचाद्यच् कुटादित्वात् ङित्वेनोऽवङ् स्यात्। ध्रुवः स्थैर्ये इति मते 'इगुपधज्ञाप्रीकिर कः'[3] इति सूत्रेण कः प्रत्यये सति ध्रुवम् इति पदं निष्पद्यते। अपायो- विभागजनको व्यापारः। विभागो न वास्तवः सम्बन्धपूर्वक, अपितु बुद्धिपरिकल्पित एव। ध्रुवमपायेऽपादानं सूत्रे विविच्यते। उक्तञ्च-

अपायार्थो विभागोऽस्ति विभागस्यावधिर्ध्रुवम्[4],
यद्ध्रुवं तदपादानं तस्माद्भवति पञ्चमी।
ग्रामादायाति मे भ्राता वृक्षात्पतति पत्रकम्,
विश्लेषो वर्तते ग्रामाद् वृक्षात् तेनात्र पञ्चमी[5]।।

उदाहरणम्-
मथुरा पाटलिपुत्रकेभ्य आढ्यतरा। अपरञ्च-
'तत्तत्कर्तृसमवेततत्तत्क्रियाजन्य-प्रकृतधात्ववाच्यविभागाश्रयत्वम् तदेवावधित्वम्'।[6] विभागश्च न वास्तवसम्बन्धपूर्वकः, किन्तु बुद्धिपरिकल्पित-सम्बन्धपूर्वको वा बुद्धिपरिकल्पित इति।[7] उदाहरणम् - 'मथुरा पाटलिपुत्रकेभ्य आढ्यतरा' इत्यत्र बुद्धिपरिकल्पिततद्भिन्नः श्रयणेनैव भाष्ये पञ्चमी विभक्तिप्रयोग इति वर्तते।अन्यच्च तल्लक्षणमुक्तम्, यथा-'प्रकृतधात्वर्थः प्रधानीभूतव्यापारनाश्रयत्वे सति तज्जन्य-विभागाश्रयत्वं ध्रुवम्'।[8] अस्मिन् लक्षणे स्पष्टेन उक्तं वर्तते, यथा - राम ग्रामात् ग्रामं गच्छति इत्यत्र गम् धातो उत्तरदेशसंयोगानुकूलव्यापारः तस्याश्रयकर्म कर्मणो विभागाश्रयः ग्राम इति ग्रामोऽत्र ध्रुवम्, अतस्तस्य अपादानत्वसंज्ञत्वात् पञ्चमी विभक्तिर्भवति। अपादानस्य भेदद्वयञ्च वर्णितम् यथा-

अपाये यद् उदासीनं चलं वा यदि वा चलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते'।।[9]

सूत्रे ध्रुवम् इति पदस्य प्रयोगो न चेद् 'कृष्णः शकटेन ग्रामाद् ग्रामं गच्छति' इत्यत्र शकटस्य प्राप्तापादानसंज्ञानिवारणाय ध्रुवस्य प्रयोगःकृतो वर्तते। 'ध्रुवमपायेऽपादानम्'[10] इति सूत्रं यथा विवृतं तथात्र प्रतिपाद्यते। ध्रुवं -स्थिरम्,अपाय – विभागजनको व्यापार तदनाश्रयमिति[11]।

अत्र अश्वात् पतति। धावतोऽश्वात् पतति।

इत्यत्र अश्वस्य त्रासादिक्रियाश्रयत्वेन तदाश्रयभिन्नः ध्रुवस्यरूपाभावात् अपादानसंज्ञा न स्यात् इत्याशङ्क्य अध्रौव्यस्य अविवक्षितत्वमत्र प्रमाणं विद्यते। यतः सतोऽप्यविवक्षा भवति यथा-

पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ।
तस्मात्दश्वस्य पतने कुड्यादि ध्रुवमुच्यते[12]।
उभावप्यध्रुवौ मेषौ यद्यत्युभयकर्मणे।
विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते।
मेषान्तरक्रियापेक्षमवधित्वं पृथक्-पृथक्।
मेषयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक्-पृथक्।।[13]

'अत्र अपादानसूत्रवृत्तौ वर्णितम्, यथा- ध्रुवं यदपाययुक्तम् अपाये साध्ये यदवधिभूतं तत्कारकम् अपादानसंज्ञं भवति'[14]। यथा-
ग्रामाद् आगच्छति।
पर्वताद् अवरोहति।
रथात् पतति।
अत्रचवार्त्तिकमेकमस्तिकात्यायनस्य 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्'।[15] एषां जुगुप्सा-विराम-प्रमादानां योगे विकल्पेन अपादानसंज्ञा भवति। उदाहरणम् –
अधर्माज्जुगुप्सते।
अधर्माद्विरमति।
धर्मात्प्रमाद्यति।
वाक्येषु येषां निर्धारितानां पदानामपादानसंज्ञा भवति, तत्र पञ्चमी ङसि, भ्याम्, भ्यस् विभक्तीनां प्रयोगो जायन्ते। यथा- 'अपादाने पञ्चमी'[16] अनुक्ते अपादानकारके पञ्चमी विभक्तिर्भवति ।अपादानञ्च त्रिविधम्।

निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा।
अपेक्षितक्रियञ्चेति त्रिधाऽपादानमुच्यते।[17]

**निर्दिष्टविषयम्** – 'अत्र साक्षात् धातुना बोधितो विषयो निरूपकोऽर्थो यस्य तत्'।[18]
उदाहरणम् – अश्वात् पतति।

**उपात्तविषयम्** – 'धातुना धात्वन्तरार्थगर्भितोविषयोऽर्थो यस्य तत् उपात्तविषयः'।[19]
उदाहरणम् – बलाहकाद् विद्योतते।

**अपेक्षितविषयम्**-'धातोरनुपादानेनाकाङ्क्षिता गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिका यस्मात्तत् अपेक्षितक्रिया'।[20]
उदाहरणम् – कुतो भवान्? पाटलिपुत्रात् 'विवक्षातः कारकाणि भवन्ति'।[21] यदा यदी यो व्यापारो धातुनाऽभिधीयते तदा स कर्ता भवति।
स्थाली पचति।अग्निः पचति।
तण्डुलः पच्यते स्वयमेव, इत्यत्र स्थाली, अग्निः, तण्डुल एते शब्दाः कर्तृभूताः सन्ति। तेन इत्थं फलति, यस्य कारकस्य विवक्षातो विपरिणामो भवति, तस्यैव कारकत्वम्। कर्तृ-कर्म-करणाधिकरणकारकाणां विवक्षाभेदेन भिन्नभिन्नरूपेण परिणितिः शिष्टसम्मताः वरीवर्तन्ते। तत्तदर्थबोधने साधुत्वम् – 'पुण्यजनकतावच्छेदकधर्मवत्वरूपञ्च वर्तते'।[22] अतः
कर्ता, कर्म, करण, अधिकरणञ्च एतेषां विवक्षाभेदेन विभिन्नरूपेण परिणति वर्तन्ते। अत एतानि चत्वारि कारकाणि। सम्प्रदानापादानयोर्न तथा विवक्षाः विभिन्ना इति न तयोः कारकश्रेण्यामागच्छति। उदाहरणम्-'विप्राय गां ददाति'। इत्यर्थे चतुर्थीविभक्तिं परित्यज्य भिन्ना विभक्तिः क्रियते चेद् तदा तस्यासाधुप्रयोगो भवति। एवञ्च 'वृक्षात् पतति', इत्यत्र पञ्चमी विभक्त्यन्तवृत्तात्, वृक्षतः इत्येव वा प्रयोगादतिरिच्य अर्थ विभक्त्यन्तप्रयोग इति। अत्र सम्प्रदानापादनयोः नानात्व विवक्षा न स्तः। नान्येषां विभक्त्यन्तानां तदर्थेषु च साधुत्वम्। विवक्षातः कारकाणि भवन्ति।[23] अनुक्ते अपादाने पञ्चमी भवति। यत्र कृत्शब्देभ्यःसमासान्तशब्देभ्यश्चानुक्तत्वे सति अपादानसंज्ञा भवति। अपादानार्थे पञ्चमी विभक्तिः स्यात्। अत्र उदाहरणम् –

न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।[24]
गाण्डीवं स्रंसते हस्तात्।[25]
स्वैरं वनादुपनयन्तु तपोधनानि।[26]

'**भीत्रार्थानां भयहेतुः**'[27] अस्य सूत्रवृत्तौ 'विभक्त्यार्थानां त्रायत्यर्थानाञ्च धातूनां प्रयोगे भयहेतुर्यस्तत्कारकमपादानसंज्ञं भवति'।[28] भयहेतुरस्ति यत्र तत्र तृतीया विभक्तेर्भावः तां बाधित्त्वा अत्र अपादानसंज्ञा जायते।
उदाहरणम्-
चौराद् विभेति।
चौरेभ्यः उद्विजते।
चौरेभ्यः त्रायते।
चौराद् रक्षति।

अत्र भयस्य कारणं चौर एव नो चेत् सूत्रे भयहेतु नअरण्ये विभेति इत्यत्र अरण्यात् विभेति इति भवेत्। एतद् निवारणाय सूत्रे भयहेतुः इति पदस्य प्रयोगो वर्तते। 'पराजेरसोढः'[29] असोढः ग्लानिविशेषो वर्तते। अत्र 'परा' पूर्वस्य 'जि' धातोः पराजयते इति पदं निष्पद्यते। असोढपदस्य योऽर्थः सोढुं न शक्यते इति तत्कारकमपादानसंज्ञकं भवति। शत्रुद्वारा पराजयं प्राप्नोति इत्यत्र अपादानसंज्ञं न भवति कारणं सूत्रे 'असोढः' पदस्य प्रयोगोविद्यते अतः 'शत्रून्पराजयते' इति प्रयोगः सिद्धम् । उदाहरणम्- अध्ययनात्पराजयते।असोढ इति प्रयोगात् 'शत्रून्' इत्यत्र द्वितीया विभक्तिरस्ति। 'वाराणार्थानामीप्सितः'[30] वारणार्थे येः धातवः सन्ति, ततः अपादानं भवति ईप्सितार्थे ।उदाहरणम् – यवेभ्यो गां वारयति। इत्यत्र कर्मणः ईप्सितः यवः कर्तुरनीप्सित इति अतः यवस्य अपादानसंज्ञा भवति। वाक्येऽस्मिन् कर्ता देवदत्तः गां कर्म वर्तते कर्मणः ईप्सितः यवः न तु कर्तुः, अतः यवेभ्य इति अपादानं सिद्धम्। गौः यवान् खादति,तां गां देवदत्तो वारयति, इत्यत्र कर्तुः ईप्सिततमो यवो वर्तते। देवदत्तो यवं रक्षति। तत्र कर्ता देवदत्त अस्ति। देवदत्तस्य यवः अनीप्सितो वर्तते। स देवदत्तो यवक्षेत्रं वारयति, गवा मा भक्षेदिति कृत्वा देवदत्त क्षेत्रं वारयति। यं देवदत्तं वारणार्थ ईप्सितं यवं तद् अपादानञ्च भवति। 'अन्तर्धौयेनादर्शनमिच्छति'[31] अन्तर्धः अत्र अन्तः उपसर्गपूर्वकं 'धा'धातोः 'उपसर्गे घोः कि' इति सूत्रेण भावे कि प्रत्यये आतो लोपे, स्वादिकार्ये सति अन्तर्धिः इति शब्दः निष्पद्यते। अन्तर्धिः व्यवधानम्, व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तद् कारकम् अपादानं भवति।
उदाहरणम् –
मातुर्निलीयते कृष्णः।
उपाध्यायाद् अन्तर्धत्ते।
अत्र अन्तर्धानस्य अष्ट नामानि सन्ति। यथा –

अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम्।
अपिधानतिरोधानपिधानच्छादनानि च।।[32]

'**आख्यातोपयोगे**'[33] सूत्रमिदमत्र जनयति। आख्याता – प्रतिपादयिता, उपयोगः – नियमपूर्वकं विद्याग्रहणम्। नियमपूर्वकविद्यास्वीकारे आख्यातस्य अपादानसंज्ञा भवति। अत्र उपयोगस्यार्थो घटति, ब्रह्मचर्यादिरूपनियमपूर्वकविद्यास्वीकारे उपयोगः शब्दः रूढः।[34] उदाहरणम्–
उपाध्यायाद् अधीते।
आचार्याद् आगमयति।

**नोटः** उपयोगनियमपूर्व यदि न भवति चेद् तत्रैवोपादाने षष्ठी भवति।यथा - नटस्य गाथां श्रृणोति।

'**जनिकर्तुः प्रकृतिः**'[35] जनी प्रादुर्भावः, अस्यार्थः उत्पत्यानुकूलो व्यापारस्तस्याश्रयः कर्ता तस्य यदुपादानकारणं तस्य अपादानसंज्ञमिति विख्यातम्। उदाहरणम्-
ब्रह्मणः प्रजाः प्रजायन्ते।
श्रृङ्गाच्छरो जायते।
गोमयाद् वृश्चिको जायते।

'**भुवःप्रभवः**'[36] भवनं भूः। भवत्यस्मादिति प्रभवः। भुकर्तुः प्रभवो यस्मात् कारकमपादानसंज्ञकं भवति। उदाहरणम् – हिमवतो गङ्गा प्रभवति। सिक्किमाद् टीष्टा प्रभवति। '**अन्यारादितरतेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते**'[37] अन्य, आरात्, इतर, ऋते, दिक्शब्दः, अञ्चूत्तरपद, आच्, आहि इत्येतेषां योगे पञ्चमी विभक्तिर्भवति। अन्यत् इत्यर्थग्रहणम्। तेन पर्याय प्रयोगेऽपि भवति।[38] उदाहरणम् –

अन्यो देवदत्तात्।
भिन्नो देवदत्तात्।
आरात् कृष्णात्।
आरात् शब्दो दुरान्तिकार्थे अस्ति।
इतरो कृष्णात्।
ऋते यज्ञदत्तात्।
पूर्वो ग्रामात् पर्वतः।

'**पञ्चम्यपाङ्परिभिः**'[39] एते कर्मप्रवचनीययोगे पञ्चमी विभक्तिर्भवति। उदाहरणम् –

हरेः जप। (हरेः परिसंसार)
आमुक्तेः संसारः।
आसकलाद् ब्रह्म।

'पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्'[40] एषां शब्दानां योगे तृतीया पञ्चमी द्वितीया च स्युः। रामं पृथक्, रामाद् पृथक्, रामेण पृथक् इति। 'करणेच स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य'[41] एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापञ्चम्यौ स्तः। ग्रामस्य दूराद्। ग्रामस्य अन्तिकाद्।अत्र पाणिनीयव्याकरणस्य अपादानकारकस्य समीक्षणमत्र समाप्यते।

## संदर्भ सूची


1. अष्टाध्यायी १. ४. २४
2. परमलघुमञ्जूषा पृ. २७८
3. अष्टाध्यायी ३.१.१३५
4. श्लोकसिद्धान्त कौ. २२५
5. श्लोकसिद्धान्त कौ. २२५
6. परमलघुमञ्जुषाकारकनिरूपणम् पृष्ठ २७८
7. परमलघुमञ्जुषा (नागेश) पृष्ठ २७८
8. वैयाकरभूषणसारः
9. वै. सि. कौ.लक्ष्मीटीका पृष्ठ ८१८
10. वै. सि. कौ.
11. लघुशब्देन्दुशेखर
12. वाक्यपदीयम्
13. भर्तृहरिःवाक्यपदीयम्
14. वै. सि कौ.
15. कात्यायन (महाभाष्यम्)
16. अष्टाध्यायी २. ३. २८
17. वै.सि. लक्ष्मीटीका पृ. ८२६
18. वै.सि. लक्ष्मीटीका पृ. ८२५
19. वै.सि. लक्ष्मीटीका पृ. ८२५
20. वै.सि. लक्ष्मीटीका पृ. ८२५
21. वै. सि कौ. पाञ्चोलीटीका
22. सिद्धान्तकौमुदी लक्ष्मीटीका पृष्ठ ८२६
23. सिद्धान्तकौमुदी लक्ष्मीटीका पृष्ठ ८२६
24. भर्तृहरि नीति ७४
25. गीता १.३०
26. स्वप्नवासवदत्तम्
27. अष्टाध्यायी १. ४. २८
28. काशिका प्रथमखण्ड ११८
29. अष्टाध्यायी१.४.२६
30. अष्टाध्यायी१.४.२७
31. अष्टाध्यायी१.४.२८
32. अमरकोष एवं लक्ष्मीटीका पृष्ठ ८२८
33. अष्टाध्यायी १.४.२९
34. वै. सि. कौ.
35. अष्टाध्यायी**१.४.३०**
36. अष्टाध्यायी १, ४ ३१
37. अष्टाध्यायी**२.३.२९**
38. काशिकायाम् पृष्ठ ३०८ प्रथमखण्ड
39. अष्टाध्यायी२. ३. १०
40. अष्टाध्यायी २. ३. ३२
41. अष्टाध्यायी १.३.३३